*ARYAVART SHODH VIKAS PATRIKA*
**ISSN No.: 2347-2944**, RNI:UPBIL04292, REG. No.: 561/2013-2014 Vol.-2, No.-2, **PP-330-334**,YEAR-2015

# वैदिकवाङ्मये मूल्यपरकशिक्षायाः स्वरूपं, तस्या आधुनिकसन्दर्भे प्रासंगिकता

**❑ डॉ0 विनोद कुमार पाण्डेय**

***सार –*** *वेदाः न केवलं भारतस्यापितु विश्वस्य प्राचीनतमसाहित्यरूपेण प्रतिष्ठिताः सर्वमान्याश्च। ''सर्वज्ञानमयो हि वेदाः'' इति समृद्धसाहित्यरूपेण शिक्षायाः वैभवं निधाय विलसन्ति वेदाः। ज्ञानविज्ञानयोः किमपि मूल्यमेतादृशं नैव विद्यते यत वेदेषु न स्यात्, अपितु विश्वस्य सर्वे विद्वांसः विचारकाः चिन्तनशीलपराः वेदेषु सन्निहितज्ञानेन प्रभाविताः संजाताः। मानवानां कृते निर्विवादेन सर्वस्वीकृतवेदेषु ज्ञानविज्ञानयोः महनीयो हि आलोकः सम्भृतः वर्तते यस्य आधुनिके काले प्रासंगिकता विद्यते। भारतीयपरम्परायां वेदाः ईश्वरीयवाणीरूपेणांगीक्रियन्ते। वेदाः अपौरुषेयाः। ऋषयो हि मन्त्र द्रष्टारः। अपौरुषेयत्त्वात् वेदानां नित्यत्वं सिद्धमेव। निम्नाश्रितेषु मन्त्रेषु ईश्वरकृतस्य प्रतिपादनं प्राप्यते।*

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्याद्यजुस्तस्मादजायत्।।[1]
यस्मादृचो आपतक्षन् यजुर्यस्मादपाकषन्
सामानि यस्य लोकमान्ययर्वांगिरसो मुखम्।।[2]

एवं वा अरेऽस्म महतो भूतस्य निःश्वासितमेद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरसः।[3] त्रयो वेदा अजायन्ताग्ने ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः।[4]

एतदतिक्ताः ब्राह्मणारण्यकगन्थाश्च वैदिकसाहित्यं वध्यिन्ति। ब्रह्म वै मन्त्रः।[5]

विविधमूल्यानां कृते वैदिकऋषयः सावधानाः चैतन्यसंयुताः दृश्यन्ते। तेषां शिक्षायाः उद्देश्यं सार्वभौमिकं वर्तते। वैदिकशिक्षा मानवानां अन्तर्निहिताः मूलप्रवृत्तयः परिष्कर्तुं सक्षमा वर्तते।

वैदिकशिक्षा ऐहिकं पारलौकिकच अखिलं निःश्रेयसं सिद्धिकर्त्रीरूपेण तिष्ठति। वैदिकशिक्षा मानवानां कृते जीवनोपयोगी, सार्वकालिकी तथा जीवनमूल्यानां आत्मसात्कर्तृत्वादमूल्या। वेदेषु सर्वत्र हि आध्यात्मिकतायाः भौतिकजीवनस्य चोत्कर्षहेतवे विधानानि प्रस्तुतानि। बुद्धेः सम्बर्धनार्थं बुद्धिमनसोः कृते सत्प्रेरकस्वरूपस्य भगवतः भाष्करस्य सूर्यस्याभ्यर्चना गायत्रीमन्त्रेण ऋग्वेदे यजुर्वेदे तथा च सामवेदे प्राप्यते।

ॐ भूभुवः स्वः तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।[6]

गायत्रीमन्त्रः सत्सल्पितः बुद्धेर्विकासकर्ता। सत्कल्पिता बुद्धिरेव सत्यज्ञानयोः अन्वेषणाय समर्था। ज्ञानालोकेनन्तःकरणस्य मालिन्यं स्वयमेव अपगच्छति। अस्मादेव वैदिकमहर्षिभिः वेदवाण्या निजसन्ततिं शिक्षितुं अभिभावकः उपदिष्टः। ''पिता नो बोधि''[7] वैदिकमहर्षेः प्रस्तुतोपदेशे अज्ञानान्धकारात् निर्गत्य ज्ञानलोके निमज्जनस्य मार्गः प्रशस्तीकृतः।

आरोह तमसो ज्योतिरेह्य ते हस्तौ रभामहे।[8]

आत्मशुद्धेः आत्मतत्त्वचिन्तनस्य च निर्देशः प्राप्यते।

दैव्याय कर्मणे शुन्धध्वम्। देवयज्जयै शुन्धध्वम्।
यत् वा अशुद्धाः पराजघ्नुं, तत् वः शुन्धामि।

एवमेव शिक्षायाः कृते मानवीयमूल्यानां बहुशः प्रतिपादनं विद्यते आधुनिके काले तस्याः शिक्षायाः प्रासंगिकता च विद्यते।

भद्रं मृदुभाषणम् – आदिवेदस्य ऋग्वेदस्य स्वरूपमेव सूक्तरूपेणास्ति। सु + उक्त इति अर्थात् सुन्दरं भाषणं उत् वा सुभाषितमेव सूक्तम्। इमे सूक्ताः सर्वत्र उत्तमविचारैः समन्विताः। एषां आश्रयः, अनुशीलनं, मधुरसम्भाषणणञ्च चेत् क्रियते, विवादस्य स्थानं नैव विद्यते। विवादानां मूले कटुवचनमेव भवन्ति चेत मधुरं

एसोसिएट प्रोफेसर–संस्कृत विभाग, के0जी0के0 (पी0जी0) कॉलेज, मुरादाबाद (उ0प्र0) भारत

कल्याणकारिणं सम्भाषणं क्रियते जनैः विवादसंघर्षयोः स्थानं नैव तिष्ठति। वेदाः निजगृहेषु सन्ततिभिः साकं कल्याणप्रदवचसां कृते उपदिशति–

"भद्रं वद गृहेषु च" भद्रं वद पुत्रैः।"[9]

कल्याणप्रदसंभाषणायैव "वाचं वदत भद्रया"[10] उक्तिः प्राप्यते। परस्परं कल्याणार्थं सम्भाणस्य कृते शिक्षा प्राप्यते। माह्वा इत्युदीर्या कुटिलं न भवितुं उपदेशं प्रदिष्टः। वैदिकशिक्षा रागद्वेषविवर्जनाय सशक्ता दृश्यते। मधुरं सम्भाषणं परान् निजं कर्तुं अद्वितीयं भवति। मधुरा वाणी न केवलं श्रोतृणां कृते अपितु वक्तृणां कृतेऽपि शान्तिप्रदा भवति एवं मृदुसम्भाषणं वक्तृणां श्रोतृणां च कृते हितकारी कल्याणप्रद□च भवति।

व्यक्तित्त्वनिर्माणम – वैदिकवाङ्मये मानवानां व्यक्तित्वस्य सर्वांगीणविकासार्थं सर्वत्र परिलक्ष्यते। कस्यचिदपि जनस्य सर्वश्रेष्ठमानवत्वस्य मूल्या□नं तस्य वैयक्तिकसमाजिकजीवनयोः पृष्ठभूमिमाश्रित्य विधीयते। वैदिकवाङ्मयं व्यक्तित्वनिर्माणेन सह जनानां सामाजिकपरिवेशमपि सुदृढीकर्तुं उत्तमं मार्ग प्रशंसति। मन्त्रदृष्टणां ऋषीणां अपौरूषेया वाणी प्रत्यक्षरूपेण मानवमनसु प्रभावं जनयति। वेदाः समग्रं व्यक्तित्त्वं विकासयति–

वाचं ते शुन्धामि। प्राणं ते शुन्धामि।
चक्षुस्ते शुन्धामि श्रोतं ते शुन्धामि।
नाभिं ते शुन्धामि चरित्रांस्ते शुन्धामि।[11]

आत्मदोषान् निवारयितुं मन्त्रः प्राप्यते।

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृष्णं
वृहस्पतिर्मे तद्दधातु। शं नो भवतु भुवनस्य यस्पतिः।[12]

वेदेषु अन्तसु स्थितानां कुभावनानां कुविचाराणां विकाराणां चोपरि विजयश्रियमवाप्य भौतिकोन्नत्या सहैव आध्यात्मिकप्रगतिपथि शनैः शनैः मार्गप्रशस्तं करोति। तत्र –

ऊँ शुक्रोऽसि भ्राजोऽसि स्वरसि ज्योतिरसि, आप्नुहि श्रेयां संमतिसमं कामः।

**सत्यागभोगः–** भारतीयसंस्कृतौ त्यागः–आदर्शजीवनमूल्यरूपेणाँीकृतः। वैदिकऋषिः भौतिकानि सुखोपभोगानि वस्तूनि धनैश्वर्यादीनि प्राप्तुं वैरोधं नैव करोति।अपितु "वयं स्यामपतयो रयीणाम्।[13] उत्तमाभिः व्यवस्थाभिः धर्मानुकूलैः आचरणैः धनस्वामी भवितुं भावनामयोदात्तकामना क्रियते। मानवजातीनां कृते अनया भावनया धनप्राप्त्यर्थं आदर्शः उपस्थाप्यते। परन्तु त्यागवृत्त्या मानवजीवनस्य प्राशस्त्यं वेदेषु सुरक्षितम्। "तेन त्यक्तेन भुञ्जीथाः।" इति निगद्य अनावश्यकरूपेण धनस□चयार्थं न कर्तुं विधानं निर्मितम्। अलोभस्य शिक्षाऽपि तत्रैवोपलभ्यते।

ईशावास्यमिदं सर्वं यत्कि□च जगत्यां जगत् ।
तेन भुञ्जीथाः मा व्यक्तेन गृधः कस्यस्विदधनम्[14]

उपर्युक्तमन्त्रमाध्ययेन त्यागमयस्योपभोगस्य शिक्षावाप्यते। त्यागपूर्वकेनोपभोगेन जगतः कल्याणेन सह आत्मकल्याणभावना निहिता वर्तते। समर्पणमेव वास्तविकं यथार्थं□च सुखं प्रददाति। अस्मात् परोपकारार्थं धनस्य समर्पणमेव यथार्थः उपयोगोऽस्ति। वेदानुप्राणिता त्यागभावनेयं विश्वहितकारिणी सर्वहितकारिणी च तिष्ठति। अनेन त्यागमयेनोपभोगेन परेषां धनसम्पदाय लोभं न कर्तुं उपदेशः उपनिषदसाहित्यं, धर्मशास्त्रं, साहित्यं, पुराण, स्मृतिग्रन्थान् तथा समस्तं भारतीयलौकिकसंस्कृतसाहित्यं प्रभावितं कृतम्। वैदिकसाहित्यस्य मूल्यपरकसन्देशमनुसरन् त्यागवृतिपूर्वकेन भोगे एव वर्तमानस्य ज्वलन्तसमस्यानां समाधानं निश्चितरूपेण विद्यते। एवं भारतीयशिक्षा पद्धतेः महन्महत्त्वं भजतेतराम्।

**कर्तव्यपरायणता** – पुरुषार्थः कर्तव्यपरायणतायाः बीजवत् प्रतिभाति। कर्मसिद्धिप्रदातारः वेदाः मानवानां कृते सन्देशं प्रददति।

कृतं मे दक्षिणे हस्ते जयो में सव्य आहितः[15]

यस्य मनः कर्मणि रमते तत् पुरुषार्थेन प्राप्यते।

"यादृशमिमन्धायि तपस्यया विदद्
स उ स्वयं वहते सो अरं करत्।"[16]

उपर्युक्ते मन्त्रे ऋषिः स्वयमेव सर्वं कर्तव्यं करणीयम् इति व्याहरति पराश्रिताः भूत्वा तथा च भाग्यमलम्ब्य ये जनाः कार्यं कुर्वन्ति ते तु दोषिणः सन्ति। अनेन हि व्यक्तेः उद्देश्यं साफल्यं नैव गच्छति। अस्मात् यो हि निजामुन्नतिं वा□छति तत्कृते कर्तव्यमेव मूलम्। मानवान् कर्तव्यस्य कृते श्रुतिः उपदिशति–

"उत्तिष्ठत् जाग्रत प्राप्य वरान्निवोधत।"[17]

यजुर्वेदे एकस्मिन् मन्त्रे कर्म कुर्वन्नेव शतवर्षाणि जीवितुं कामना विहिता।

"कुर्वन्नेवेह कर्माणि"[18]

निजकर्तव्यं विदधन् शतवर्षाणां जीवनयाचनं वैदिकऋषेः आशावादस्य द्योतकम् वर्तते।

अहिंसा – वैदिकऋषिभिः सर्वदैव शान्तिमूलायाः अहिंसाया कृते प्रार्थना कृता। जीवहत्या तैः वर्जिता। यज्ञानां महत्त्वं स्वीकृतम्। हिंसारहितस्य यज्ञस्यैवावधारणा प्रार्थना–स्तुयतूश्च सम्पादिताः।

"तेना वह सुकृतो अध्वराँ।"[19]

प्रस्तुतोऽयं मन्त्राशः हिंसारहितयज्ञस्य प्रेरणां ददाति। अन्यस्मिन् स्थले ऋषिणा ऊषा प्रार्थिता यत् हिंसकैः विरहितं गृहं प्रापणीयम्। "प्र नो यच्छतादवृकं पृशुच्छर्दिः"[20]

रुद्रं देवतारं "मा नः रीरधत" अहिंसायाः कृते मार्मिकाः स्तुतयः अवलोकनीयाः विद्यन्ते।

"वि पथो वाजसातये चिनुहि वि मृधो जहि। साधन्वामुग्र नो धियः।"[21]

"या न रिष्यते"22 मन्त्रेण अहिंसायाः कृते कामना विहिता।।।

विश्वशान्त्यर्थं वेदेषु सर्वत्र अहिंसायाः प्रतिष्ठापनं दृश्यते। हिंसया शत्रुता–घृणा–द्वेषाशान्तीनां वातारणं समुत्पद्यते। विपरीतत्वात् बन्धुत्व–दया–प्रेम–सौहार्द–अनुरागेत्यादयः शान्तेः वर्षया मानवेषु सुखं जनयन्ति। "वेदेषु क्वापि हिंसा नैव स्वीकृता"।

या नो हिसीज्जनिताः।।[23]

"या हिंसी पुरुषं जगत्।[24] क्वापि न हिंस्यात् सर्वभूतानि इति व्याहृतम्। तथा च

"मा हिसिष्ट पितरः केन चिन्नोयदव् आगःपुरुषता कराम्"[25]

**शुद्धआचरणम्** – मानवस्याचरणं तस्य समग्रव्यक्तित्वस्य च शुद्धकर्मणां नियामकं भूत्वा तिष्ठति। श्रेष्ठव्यक्तित्वस्य कृते शुद्धानामाचरणानामनिवार्यत्वं भजतेतराम्। वैदिकमहर्षिभिः आचरणस्य शुद्धतायै यमनियमयोः अनुशासनपूर्वकमनुपालनं तथा मर्यादापूर्वकमाचरणार्थं उपदेशाः प्रदत्ताः। मानवैः अस्तेयं, व्यभिचारः, ब्रह्महत्या, गर्भपातः, सुरापानं, दुराचारः पापकर्म, इत्यादयः न करणीयाः।

सप्तमर्यादाः कवयस्ततक्षु स्तामामेकामिदभ्यहुरोगात्। अयोर्ह स्कम्भ उपमस्य नीलपथां विसगै धरुणेषु तस्थौ।"[26]

तथा च– यास्ते शिवास्तन्वः कामं भद्रा याभिः सत्यं भवति यद् वृणीये।

ताभिष्टमस्यां अभिसंविशस्वान्यत्र पापीरप वेशया धियः।।[27]

चारित्रिकपतनात् भयं कुर्वन् ऋषिः कामयते – "ते या रक्षन्तु विम्रसश्चरित्रात्।"[28]

सामाजिकताविकासः मानवो हि सामाजिकः प्राणी। समाजेन विना नास्ति कस्यचिदस्तित्वम्। एतत् वेदेषु बहुलतया सामग्री प्राप्यते यथा– मित्रस्य चक्षुषा सर्वाणि भूतानि ईक्षन्ताम्।[29]

अपौरुषेण शब्दैः निर्देशः प्राप्यते– मानी वः आकूतिं समाना हृदयानि वः।

समानमस्तु वो मनः यथा वः सुसाहसति।[30]

तथा सर्वेषा कृते "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः" इति विचारमनुकुर्वन् ऋषिः स्थीयते।

सर्वभूतहितभावना– सर्वेषां प्राणिनां कृते आत्मदृष्टिः एकत्वभावना च विश्वशान्तेः मूल्यम्। प्रस्तुतेन मन्त्रेण वैदिकमहर्षिणा आत्मदृष्टया द्रष्टुं भावना एभिरूद्गारैः उपलभ्यते।

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानत।[31]

सर्वेषां हिताय वैदिकऋचासूपलभ्यते।

प्रियं सर्वस्य पश्यत उत शूद्रे उतार्ये।[32]

भारतीयसंस्कृतेः सारभूतः मधुरतयोपदेशः ऋग्वेदे प्राप्यते। तत केवलं मानवानामपितु पशुपक्षिणां प्रति उदात्तभावनायाः दर्शनं संजायते।

शन्नो भव द्विपदे शं चतुष्पदे।[33]

सर्वं प्रति मित्रताभावः – बन्धुत्वभावना अमृतमयेषु उपदेशेषु प्राप्यते।

सर्वा आशा मम मित्रं भवन्तु।[34]

बन्धुर्मे माता पृथिवी महीयम्।[35]

पुमान् पुमांस परिपातु विश्वतः।[36]

शं नो भृव हृद।[37]

दाम्पत्यजीवनस्यादर्शः – ब्रह्मचर्योपरान्ते

ब्रह्मचारिणां कृते गृहस्थाश्रमः एवं शारीरिक– मानसिकाः यात्मिकोन्नतये साधकस्वरूपेण स्वीकृतः। विवाहकाले कन्यायाः करगृहणं विधाय मन्त्रोऽयं प्रयुज्यते –

"गृभ्णामि ते सौभगत्वाय हस्तं मया पत्याजरदष्टिर्यथासः।
भगो अर्यमासविता पुरं धिर्मह्यत्वादुर्गार्हपत्याय देवाः।38

विवाहान्तरं पतिगृहे पत्नी सम्मानस्याधिकारिणी। नववधूनां कृते श्वसुरालमध्ये सम्राज्ञी भूत्वा शासनार्थं ऋषिकामनावलोकनीया–

"सम्राज्ञी–श्वसुरे भव सम्राज्ञी श्वश्रवां भव।
ननान्दरि सम्राज्ञी भव, सम्राज्ञी अधि देवृषु।।[39]

पतिपत्न्योर्मध्ये आजीवनं मधुरो सम्बन्धः दृश्यते। विवाहस्य मुख्यो हि उद्देश्यः पुत्रप्राप्त्या वंशपरम्परायाः सम्बर्धनमपेक्षितम्।।

नवविवाहितदम्पतेः कदाचिदपि विरहः न भवेदिति कृते रमणीया कामना विहिता–

"इहैव स्तं मा वि यौष्टं विश्वं आयुर्व्यश्नुतम्।
कीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ।।[40]

पतिपत्न्योः सौमनस्य कमनीया चर्चावलोकनीया।

"अमोऽहमस्मि माहसा त्वं सामाहमस्म्यृक्तृत्त्वं द्यौरहं पृथिवीत्वम्।
ताविह संभवाव प्रजाया जनयावहै।[41]

वृषा सत्यं योषाश्रृद्धा वृषा मनोयोषा वाक्।।
यत्रैव पतिस्तत्र जायेति।[42]

सत्यम – सत्यस्य कृते वेदाः जागरुकाः दृश्यन्ते श्रृद्धया सत्यमाप्यते।[43]

असत्यं परित्यज्य सत्यमुपगमनाय वैदिकऋषिः निर्दिशति।

अग्ने व्रतपते– वृतं चरिष्यामि तुच्छकेयं तन्मे राध्यताम्।
इदमहमनृतात्सत्यमुपैमि।[44]

राष्ट्रीयता – राष्ट्रीयभावना वेदेषु बहुत्र दृश्यते। माता भूमिः पुत्रोऽहं प्रथिव्याः।[45]

राष्ट्रवादस्य भावनां जागरितं संघशक्तेः प्रेरणात्रऋषिः ददाति– गाणेन मा रिषण्यः।[46]

राष्ट्रसंरक्षणार्थं वैदिकऋषिः उपदिशति। व्यचिष्टे बहुपथ्ये स्वराज्ये।[47]

दानशीलता – दानं भारतीयसंस्कृतेः श्रेष्ठतायाः अवश्यकं अंगरूपेण समधिष्ठति।

"तेन त्यक्तेन भुञ्जीथाः" इति कथनं दानस्य महन्महत्त्वं प्रतिपादयति। एकस्मिन् मन्त्रे अदातृकृते पापस्य निदर्शनं प्राप्यते।

मोघमन्नं विदन्ते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य।
नार्यमाणं पुष्यति नौ सखायं केवलाद्यो भवति केवलादि।[48]

यस्य भावः दानकर्मणः ओजस्विनी व्याख्या सम्पादिता। केन जनेन धनस्य प्रयोगाः दानरूपेण न क्रियते तथा च तस्योपयोगः स्वयमेव करोति। सः पापी परिगणितः। मित्राणां कृतेऽपि दानं दातव्यमिति वर्णने एकः मन्त्रः अत्र प्रस्तूयते–

न स सखा यो न ददाति सख्ये, सचाश्रुवे सचमानाय पित्वः।
अपास्यात् प्रेमान् न तदेको अस्ति पृणन्तमन्यमरणं चिदिच्छेत्।[49]

अथ च सश्रृद्धया दानार्थं उपदेशः प्रदत्तः। प्रियं श्रद्धे ददतः प्रियः श्रद्धे पिपासतः।[50]

दानार्थं लोभप्रवृत्तस्य व्यापारिवर्गस्य कृते प्रेरणा प्रदीयते "आदित्स चिदागृणेपूषन्दानायचोदय" पणोश्चिदिव मृदा मनः[51]

क्षमायाचनायाः प्रार्थना उपलभ्यते यच्चिद्धि ते विशो यथा प्रदेव वरुणव्रतम्।।
मिनीमसि द्यवि द्यवि।।[52]

प्रायश्चितकर्मणां कृते स्तुतिपरकमन्त्राः बहुशो हि लभ्यन्ते।

कियाग आस वरुण ज्येष्ठं यत्स्तोतरं जिघांससि।
सखायम् प्र तन्मे वाचो दूलभ स्वधावोत्त्व त्वानेना नमसा तुइमयामे।[53]

पशूनां कृते मंगलकामनायाः महती आवश्यकता वरीवर्ति। पशूनां स्वास्थ्यं तेषां पुष्टत्त्वं बिना शुद्धं शक्तिशालिदुग्धं कदापि न प्राप्नुयात्। अतः स्वास्थ्यसमृद्धिकामना एकस्मिन् मन्त्रेऽवलोक्यते–

स नः पवस्व शं गवे।[54]
शन्नो भव द्विपदे शं चतुष्पदे।[55]
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत[56]

एवं आत्मविद्यारूपं साध्यमवाप्य शास्त्रीयविद्यां साधनस्वरूपां स्वीकृत्य सुमतिमन्विच्छन्तुः वैदिकाः ऋषयः तत्त्वज्ञान

प्राप्त्यर्थं सद्विद्यायाः कृते संकेतयन्ति। विद्ययैव मृत्योः अमरतायाश्च भेदज्ञानं जानन्तः प्रजाजनाः स्वगन्तत्यं प्राप्नुवन्ति।

समासतः कथितुं शक्यते वैदिकशिक्षाभिः स्वजीवनेन अन्यानपि धन्यं कुर्वन्तः मानवाः पुरुषार्थचतुष्टयं प्राप्नुवन्ति इति मे मतिः।

## सन्दर्भ ग्रन्थ सूची


1. ऋग्वेदः— 10—90—9.
2. अथर्ववेदः— 10—7—20.
3. वृहदारण्यक उपनिषद्— 2—4—10.
4. शतपथ ब्राह्मणः — 11—52—3.
5. शतपथ ब्राह्मणः— 7/1/1/5.
6. ऋग्वेदः— 3—62—10 यजुर्वेद— 3/35, सामवेद— 1462.
7. यजुर्वेद— 37/20.
8. अथर्ववेदः— 8—1—8.
9. ऋग्वेदः— 4—43—2.
10. अथर्ववेदः— 3—3—3.
11. यजुर्वेदः— 6—14.
12. यजुर्वेदः — 36—2.
13. यजुर्वेदः— 10—20.
14. यजुर्वेदः — 40—1.
15. ऋग्वेदः — 6—52—8.
16. ऋग्वेदः — 5—44—8.
17. कठोपनिषद् — 1—3—131.
18. यजुर्वेदः — 40—2.
19. ऋग्वेदः — 2—48—11.
20. ऋग्वेदः — 2—48—15.
21. ऋग्वेदः — 6—53—4.
22. ऋग्वेदः — 8—48—10.
23. ऋग्वेदः — 10—121—9.
24. ऋग्वेदः — 16—3.
25. ऋग्वेदः — 10—15—6.
26. ऋग्वेदः — 10—5—6.
27. अथर्ववेदः — 9—2—25.
28. ऋग्वेदः — 8—48—5.
29. यजुर्वेदः — 36—18.
30. ऋग्वेदः — 10—19—3.
31. यजुर्वेदः — 40—7.
32. अथर्ववेद — 19—61—1.
33. ऋग्वेदः — 7—54—1.
34. अथर्ववेद — 17—15—6.
35. ऋग्वेदः — 1—164—33.
36. यजुर्वेदः — 29—51.
37. ऋग्वेदः — 8—48—4.
38. ऋग्वेदः — 10—85—36.
39. ऋग्वेदः — 10—85—46 तथा अथर्वेद — 14—1—44.
40. अथर्वेदः — 14—1—22.
41. अथर्वेदः — 14—2—17.
42. शतपथ ब्राह्मणः — 12—8—2—6.
43. यजुर्वेदः — 19—30.
44. यजुर्वेदः — 1—5.
45. अथर्वेदः — 12—1—12.
46. ऋग्वेदः — 7—9—5.
47. ऋग्वेदः — 5—66—6.
48. ऋग्वेदः — 10—117—6.
49. ऋग्वेदः — 10—117—4.
50. ऋग्वेदः — 10—15—2.
51. ऋग्वेदः — 6—53—3.
52. ऋग्वेदः — 1—115—6.
53. ऋग्वेदः — 7—86—4.
54. ताण्ड्यब्राह्माणः—
55. ऋग्वेदः — 7—54—1.
56. ऋग्वेदः — 8—30—4.


*****